# 8 मम दिनचर्या

एषा का ?




कः समयः ?

(घटीं दृष्ट्वा उपर्युक्त रिक्तस्थानेषु समयं लिखतु)

| | | | |
|---|---|---|---|
|  |  |  |  |
| 6:05 | 11:10 | 7:55 | 6:50 |
| पञ्चाधिकषड्वादनम् | दशाधिक एकादशवादनम् | पञ्चोन अष्टवादनम् | दशोन सप्तवादनम् |

कः समयः ?



______ ______ ______ ______



### मम दिनचर्या

अहं प्रतिदिनं षड्वादने उत्तिष्ठामि । षड्वादनतः सार्धषड्वादनपर्यन्तं दन्तधावनं स्नानं च करोमि । सार्धषड्वादनतः सप्तवादनपर्यन्तं योगासनं करोमि । तदनन्तरं दुग्धं पिबामि अल्पाहारं च करोमि ।









मम माता गृहकार्यं करोति । अहं तां साहाय्यं करोमि । नववादनतः दशवादनपर्यन्तम् अध्ययनं करोमि। सार्ध एकादशवादने भोजनं करोमि। सपादद्वादशवादने विद्यालयं गच्छामि । तत्र अहं विविधान् विषयान् पठामि ।

सायं षड्वादने अहं गृहम् आगच्छामि । सपादषड्वादनतः सपादसप्तवादनपर्यन्तम् अहं क्रीडामि । तदनन्तरम् अहं सायं प्रार्थनां करोमि । सार्धसप्तवादनतः सार्धअष्टवादनपर्यन्तं पुस्तकं पठामि । सार्ध अष्टवादने भोजनं करोमि । नववादनतः सार्धनववादनपर्यन्तं दूरदर्शनं पश्यामि । सार्ध नववादनतः दशवादनपर्यन्तं जनन्या तातेन च सह वार्तालापं करोमि । दशवादने शयनं करोमि ।



## टिप्पणी

**तः** થી **पर्यन्तम्** સુધી **उत्तिष्ठामि** ઊઠું છું **दन्तधावनम्** દાતણ કરવું **दुग्धम्** દૂધ **अल्पाहारः** નાસ્તો **दूरदर्शनम्** ટેલિવિઝન **जननी** માતા **तातेन सह** પિતાની સાથે

## स्वाध्यायः

**1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :**

उत्तिष्ठामि, षड्वादनतः, दन्तधावनम्, तदनन्तरम्, जनन्या, वार्तालापम्

**2. પોતાની દિનચર્યાને લગતા પ્રશ્નોના ઉત્તર આપો :**

(1) भवान् कदा उत्तिष्ठति ?

(2) भवती कति वादने प्रार्थनां करोति ?

(3) भवान् कदा विद्यालयं गच्छति ?

(4) भवती कदा क्रीडति ?

(5) भवान् कति वादने गृहकार्यं करोति ?

3. કોષ્ટક પરથી વાક્યો બનાવો :

| अ | ब | क |
|---|---|---|
| प्रातः | षड्वादने<br>नववादने | अल्पाहारम्<br>उत्थानम् |
| मध्याह्ने | द्वादशवादने | पठनम् |
| सायम् | षड्वादने<br>सप्तवादने | भोजनम्<br>कथाश्रवणम् |
| रात्रौ | अष्टवादने<br>दशवादने | अध्ययनम्<br>शयनम् |


4. ચિત્ર જોઈને સમય નોંધીને વાક્યો લખો :




______________________________



______________________________



छात्राः एकादशवादने प्रार्थनां कुर्वन्ति





5. **ઉદાહરણ પ્રમાણે તમારી દિનચર્યાનાં વાક્યો બનાવો :**

**ઉદાહરણ :** अहं प्रातः षड्वादनतः सप्तवादनपर्यन्तं नित्यक्रियां करोमि ।

(1) अहं ______ योगाभ्यासं करोमि ।

(2) अहं प्रातः नववादनतः सार्ध नववादनपर्यन्तं ______ करोमि ।

(3) अहं ______ अध्ययनं करोमि ।

(4) अहं सायं षड्वादनतः सप्तवादनपर्यन्तं ______ करोमि ।

## 6. ઉદાહરણ પ્રમાણે વાક્યો બનાવો :

| બસનું સમયપત્રક | | |
|---|---|---|
| રૂટ | આગમન | નિર્ગમન |
| उपलेटा – राजकोट | ९:०० | ९:१० |
| पोरबन्दर – अमदावाद | १०:१० | १०:२० |
| बाटवा – वडोदरा | १२:१५ | १२:३० |
| जामजोधपुर – जसदण | १५:०५ | १५:१० |
| कोलकी – धोराजी | १६:३० | १६:३५ |

**उदाहरण :**

उपलेटा–राजकोट लोकयानम् ९:०० वादने आगच्छति एवं ९:१० वादने गच्छति ।

## 7. તમારી દિનચર્યાનું કથન અને લેખન કરો :

**भवान् जानाति किम् ?**

श्रीमद् भगवद्गीतायां अष्टादश अध्याया: सन्ति ।

श्रीमद् भगवद्गीता महाभारते भीष्मपर्वणि अस्ति ।

चत्वार: मठा: सन्ति–शृगेरीमठ: शारदामठ:, ज्योतिर्मठ:, गोवर्धनमठ: ।

महाभारतस्य युद्धं अष्टादश दिनानि पर्यन्तं प्राचलत् ।

श्रीमद भगवद्गीतायां सप्तशतं श्लोका: सन्ति ।

गायत्रीमन्त्रस्य मन्त्रद्रष्टा विश्वामित्र: अस्ति ।